**आकाशवाणी**

**दिनाङ्क : 24/08/2025** **सायम् - 06:20**

**मुख्यवार्ता:**

- **भारतीय अंतरिक्ष अनुसंधान संगठनेन गगनयानाय प्रथमं एकीकृतं उड्डयन परीक्षणं साफल्येन सम्पादितम्।**
- **भारतं बहुस्तरीय वायु-रक्षा-क्षमता स्थापनाय प्रथमं वायुरक्षा-शस्त्र-प्रणाल्या: उड्डयन-परीक्षणं सफलतया अकरोत्।**
- **रक्षामंत्री राजनाथसिंहः अद्य अवदत् यत् भारतं प्रथमस्य मानव-अन्तरिक्षयान-अभियानस्य गगनयानस्य कृते पूर्णतया सज्जः अस्ति।**
- **केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य राष्ट्रिय-राजधान्यां दिल्ली-विधानसभायां द्वि-दिवसीय अखिल-भारतीय-अध्यक्ष-सम्मेलनस्य उद्घाटनम् अकरोत्।**
- **फिजी देशस्य प्रधानमंत्री सिटिवेनी लिगामा-मादा राबुका इत्येषः भारतस्य त्रिदिवसीय आधिकारिक-यात्रायाम् अद्य प्रातः नवदिल्ल्यां सम्प्राप्तवान्।**
- **बिहारे राजस्थाने च प्रचण्डवृष्ट्या सस्यानि सम्पत्तयः च व्यापकरूपेण नष्टाः अभवन्।**
- **कज़ाकिस्तानदेशस्य श्यामकेंट-नगरे षोडशतमायां लक्ष्यभेद-प्रतिस्पर्धायां भारतीयलक्ष्यभेदकः ऐश्वर्यप्रतापसिंह तोमर इत्येषः पंचाशत् मीटर परिमितायां राइफल-थ्री-पोजिशन-स्पर्धायां स्वर्णपदकं विजितवान्।**

**गगनयान**

रक्षामंत्री राजनाथसिंहः अद्य अवदत् यत् भारतं प्रथमस्य मानव-अन्तरिक्षयान-अभियानस्य गगनयानस्य कृते पूर्णतया सज्जः अस्ति। एतत् न केवलं प्रौद्योगिकीय-उपलब्धिः अपितु आत्मनिर्भर-भारतस्य यात्रायाः नूतनः अध्यायः अस्ति। रक्षामंत्री नवदिल्ल्यां गगनयान अभियानस्य कृते चितानां यात्रिणां ग्रूप्-कैप्टन-शुभांशु शुक्ल, प्रशान्त् बालकृष्णन् नायर्, अजित् कृष्णन्, अङ्गद् प्रतापः इत्येतेषां सम्मान-समारोहं सम्बोधयन् एतत् उक्तवान्। मन्त्री अवदत् यत् भारतेन चन्द्रतः मङ्गलपर्यन्तं स्वस्य उपस्थितिं पूर्वमेव पंजीकृतम्। अस्मिन् अवसरे भारतीय-वायुसेनायाः ग्रूप्-कैप्टन शुभांशु शुक्लः सद्यः एव स्वस्य अन्ताराष्ट्रिय-अन्तरिक्षस्थानकस्य यात्रायाः विषये उक्तवान्।

**डी. आर्. डी. ओ.**

रक्षा-अनुसन्धान-विकास-सङ्घटनम् ह्यः ओडिशा-तटस्य समीपे एकीकृत-वायु-रक्षा-शस्त्र-प्रणाल्याः आई. ए. डी. डब्ल्यू. एस्. इत्यस्याः प्रथम-उड्डयन-परीक्षणं सफलतया अकरोत्। आई. ए. डी. डब्ल्यू. एस्. इति एका बहुस्तरीय-वायु-रक्षा-प्रणाली अस्ति यस्मिन् सर्वाः स्वदेशीयाः त्वरित-प्रतिक्रिया-भूतलतः वायु-क्षेपणास्त्रं, उन्नत-अति-लघु-परिधि-वायु-रक्षा-प्रणाली- क्षेपणास्त्रं, उच्च-शक्तियुक्तः लेज़र्-आधारितः निर्देशित-ऊर्जा-शस्त्रः च सम्मिलिताः सन्ति। सोशल मीडिया संदेशे रक्षामंत्री राजनाथसिंहः एकीकृत-वायु-रक्षा-शस्त्र-प्रणाल्याः सफलतया विकासाय डी. आर्. डी. ओ., भारतीय-सशस्त्र-बलानि, उद्योगानि च अभिनन्दितानि।

**प्रधानमन्त्री-गुजरात दौरा**

प्रधानमन्त्री नरेन्द्रमोदी श्वः गुजरातराज्यस्य द्वि-दिवसीय यात्रायाम् भविष्यति। यात्रायाः प्रथमदिने श्रीमोदी अहमदाबाद्-नगरे प्रायः सार्द्ध-पञ्चसहस्र-कोटिरूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनं करिष्यति। भ्रमणस्य द्वितीये दिने प्रधानमन्त्री अहमदाबाद्-नगरस्य हंसलपुरे शत-देशेषु हाईब्रिड्-बैट्री-इलेक्ट्रोड् इत्यस्य स्थानीय-उत्पादनस्य, बैट्री-इलेक्ट्रिक्-वाहनानां निर्याताय च ध्वज प्रदर्शनं करिष्यति।

**प्रधानमन्त्री- प्रकाशपर्व**

प्रधानमन्त्रिणा नरेन्द्रमोदिना श्रीगुरुग्रन्थसाहिब इत्यस्य प्रकाशपर्वस्य अवसरे शुभाशयाः प्रेषिताः। एकस्मिन् सोशल मीडिया सन्देशे श्रीमोदी अवदत् यत्, श्रीगुरुग्रन्थसाहबस्य कालातीत-उपदेशाः सम्पूर्णे विश्वे जीवनं प्रकाशयन्ति, यत् अस्मान् करुणायाः, विनम्रतायाः, सेवायाः च मूल्यानि स्मारयन्ति।

**अमित शाह-सम्मेलनः**

केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य राष्ट्रिय-राजधान्यां दिल्ली-विधानसभायां द्वि-दिवसीय अखिल-भारतीय-अध्यक्ष-सम्मेलनस्य उद्घाटनम् अकरोत्। सम्मेलनमिदं केन्द्रीयविधानसभायाः भारतस्य प्रथमाध्यक्षस्य रूपेण विठ्ठलभाई पटेलवर्यस्य निर्वाचनस्य शतवार्षिकम् आचर्यते। अस्मिन् अवसरे, गृहमन्त्रिणा उक्तं यत्, यथा देशस्य स्वातन्त्र्यं महत्त्वपूर्णम् आसीत्, तथैव स्वातन्त्र्यानन्तरं राष्ट्रस्य सञ्चालनं लोकतान्त्रिकरूपेण भवेत् इति सुनिश्चितं कर्तव्यम्। सः अवदत् यत् विठ्ठलभाई पटेलः भारतीयविचाराणां आधारेण लोकतान्त्रिकशासनस्य स्थापनार्थं आधारं स्थापितवान् इति। सभां सम्बोधयन् संसदीयकार्यमन्त्री किरेन रिजिजुः अवदत् यत्, द्विदिवसीय अध्यक्ष-सम्मेलनम् उत्तमप्रथानाम् अध्ययनार्थं अतीव उपयोगी अस्ति इति। अस्मिन् अवसरे, गृहमन्त्री विठ्ठलभाई पटेलवर्यस्य सम्मानार्थं स्मारकरूपेण प्रैष्यचिटीका प्रकाशितवान्।

**बिहार-रवि शङ्कर प्रसादः**

भाजपा-दलस्य वरिष्ठः नेता तथा च राष्ट्रिय-प्रवक्ता रविशङ्कर-प्रसादः अद्य आरोपितवान् यत् काङ्ग्रेस्-दलस्य नेता राहुलगान्धी तथा आर्. जे. डी.-दलस्य नेता तेजस्वी-प्रसाद-यादवः च मतदातृ-अधिकार-यात्रायाः समये कुण्ठा-वशात् प्रधानमन्त्रिणं नरेन्द्रमोदिनं-विरुद्धं अमर्यादित-भाषायाः प्रयोगं कृतवन्तौ। पटना-नगरस्य भाजपा-कार्यालये वार्ताहर सम्मेलने श्रीप्रसादः आरोपितवान् यत् विपक्षीदलानां नेतृणां भारतस्य निर्वाचन-आयोगः इत्यादिषु संवैधानिक-संस्थासु विश्वासः नास्ति अतः ते निर्वाचन-सूच्यां विशेष-गहन-संशोधनस्य विरोधं कुर्वन्ति इति।

**फिजी प्रधानमंत्री – भारत यात्रा**

फिजी देशस्य प्रधानमंत्री सिटिवेनी लिगामा-मादा राबुका भारतस्य त्रिदिवसीय-यात्रायाम् अद्य प्रातः नवदिल्ल्यां सम्प्राप्तवान्। शिक्षायाः पूर्वोत्तरस्य च विकास राज्य मंत्री सुकांत मजूमदारः वायुयान स्थानके तस्य स्वागतं विहितवान्। विदेश मंत्रालयेन एकस्मिन् वक्तव्ये प्रोक्तं यत् प्रधानमंत्रिणः राबुकायाः भारतस्य प्रथमेयं यात्रा वर्तते। श्री राबुका श्वः प्रधानमत्रिणा नरेन्द्र मोदिना सह परिचर्चां करिष्यति। सममेव सः राष्ट्रपति-पदासीनया द्रौपदी मुर्मु वर्यया साकं मेलनं करिष्यति।

**ऋतुविभागः**

बिहारे राजस्थाने च प्रचण्डवृष्ट्या सस्यानि सम्पत्तयः च व्यापकरूपेण नष्टाः अभवन्। राजस्थाने, विगतत्रयेषु दिनेषु अनेकेषु मण्डलेषु प्रचण्डवृष्ट्या सामान्यजीवनं भृशं बाधितम् अस्ति। दौसायां अत्यन्तं प्रचण्डवृष्टिः अभिलिखिता। अलवर, जयपुर, सवाई-माधोपुर, सीकर, टोङ्क-नगरेषु च प्रचण्डवृष्टिः अभवत्, येन निम्नवर्ति प्रदेशेषु जल-प्लावनं जातम्।

**लक्ष्यभेद-स्पर्धा**

कज़ाकिस्तानदेशस्य श्यामकेंट-नगरे षोडशतमायां लक्ष्यभेद-प्रतिस्पर्धायां भारतीयलक्ष्यभेदकः ऐश्वर्य-प्रताप-सिंह तोमरः पंचाशत्-मीटरपरिमितायां राइफल-थ्री-पोजिशन-स्पर्धायां स्वर्णपदकं विजितवान्।

**धनुर्क्रीडा**

भारतस्य चिकिथा तनिपर्थी इत्येषा कनाडादेशे आयोजितायां विश्व-स्तरीय-धनुर्प्रतिस्पर्धायां स्वकीयं प्रथमं विश्वपदकं विजित्य प्रथमा भारतीय-कम्पाउंड-महिला अभवत्।

**।। इति वार्ता ।।**